१४० गोनिस्स्त्रेः स्तोर्लिटि बभ्रुवबभ्रुवतुरित्यादिसिद्धिपरभाष्यस्वरसात् ॥ चंद्रनीति ॥ हलि चेति दीर्घः प्र
140 त्ययस्तु गतशिरोमणौ वीरिति दीर्घ इत्याकं ॥ तत्तु वोरित्यनुवर्तमाने इत्येवं परं व्याख्येयम् ॥ स्वरफला
श्चेति तु कुम्रश्चच्वरिति ॥ पदांते वोरुपधाया इति दीर्घः ॥ चं स्वात इति ॥ यत्तु प्राचा चंखन्त इत्युदाहृतं
॥ पत्त्वव्याचहृते धातुग्रहणात्कं पतुः किवेत्यात्वाभावे ऽब्दोनोपदेशत्वाभावान्न नलोपः ॥ अत्र नास्ति
कस्य क्विप्सलोपि निदीर्घोपि न ॥ आत्वेन बाधितत्वादित्याद्यतदुभयमपि न ॥ नित्यत्वादात्वस्या
प्रवृत्तौ मानाभावाद्धातुग्रहणेन्याहिर्वचनमप्रमाणमित्युक्तत्वादात्वाभावपक्षस्तुपक्रम्यात्वेन
दीर्घो बाध्यत इत्युक्ते व्याहृतत्वाच्चा ए तेन जनसनोर्जञ्ज्ञांतः संसंन इत्यादि प्राचामुदाहरणामसा
धुत्वेनेत्यवधेयम् ॥ योयुपादि ॥ निवृतिषिलिङः सार्वधातुकत्वान्न दीर्घः ॥ अयोयावीदिति ॥ सिचि वृद्धिरिति राम
नित्या वृद्धिः ॥ निमित्तांशेऽनुबंधनिर्देशोपि तद्देशपेतदभावान्न तन्निषेधः ॥ अत एव चर्करीतमस्य चक्रतीत्यादौ क्वि १४०

निचेतिनिषेधस्यननिषेध इतिभावः। जाहेतीत्यादि॥ हाकूहाङोस्तुल्यानिरूपाणि॥ ननु नैतद्यु
क्तम् किंतइतिप्रतिषेधाद्धाकोऽभ्यासदीर्घस्य दौर्लभ्यात्॥ न चधातुरेवकित्तन्नत्वभ्यासइतिवाच्यं।
द्विष्प्रयोगपक्षे तस्यापि कित्वानपायात्। नच कृतद्वित्वस्यसमुदायस्यैवार्थवत्वेन तत्प्रत्येकम
नर्थकत्वेन व्यवहारस्याभिवि दत्वात् कित्वमपि कृतद्वित्वस्यैवेत्यभ्यासस्याकित्वाद्दीर्घोनदुर्ल
भइतिनव्योक्तः सिद्धान्तो पुनरुक्तइति वाच्यम् प्रत्येकमनर्थकत्वे युक्त्यभावेन प्रतिज्ञामात्रेणासिमता
र्थालाभात्। नचनानर्थकेलोऽन्त्यविधिरित्यत्रानभ्यासविकारइतिवाक्यशेषात्तन्निर्णयइतिवाच्यं।
स्वानेद्विर्वचनपक्षाभिप्रायेणावाक्यशेषोपपन्नेः। द्विष्प्रयोगेतु अभ्यासस्यार्थवत्वान्नानर्थकइत्य
स्याप्रवृत्तावनभ्यासविकारइतिव्यर्थत्वादनुवादमात्रं। विभर्तिपिपर्तीत्यादावित्वस्यालोऽन्त्यविधि
नैवान्त्यस्यसिद्धत्वात्। अत एवस्वकृत्वादृवेइतिसूत्रेकृतेपिद्वित्वेप्रत्येकमेवार्थवत्वंस्पष्टमेवव्या
कृतंभाष्यकैय्यटयोः॥ नचैवंपित्सतित्रिप्सतीत्यादावत्रलोपोभ्यासस्येतिलोपोयंन्यस्यस्यादितिवा

मनोर
मातेत्वबोधि
नीकृदुत्तः।

लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यतीति पस्पशायामुक्तत्वात्। ३

सि॰र॰ति
१४१
141

च्यं। कर्तुरीप्सिततमं कर्म। श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमान इत्यादिनिर्देशात् सनं ते द्वितीये काजवधिक
द्वित्वेऽभ्यासा। नर्थक्यस्य द्वन्द्वचत्वाद्धलादिशेषापेक्षया नित्यत्वे नाभ्यासलोपस्यैव न्याय्य
त्वाल्लोपस्य विकारयदवाच्यत्वाभावात्। तस्मात्प्रकृते दीर्घो दुर्लभ एवेति चेन्न। न विधते कि
त्नीगादिर्यस्मिन्नभ्यासे इति बहुव्रीहिघटितसमस्यार्थे बहुव्रीह्याश्रयणेन जाहेतीत्यादौ दी
र्घस्य स्थपादत्वात्। तायत्तु प्राचा जहात्यभ्यासस्य न दीर्घ इति मतं तमुक्तं तदाकरविरोधादुपेक्ष्यं। जाहि
त इति। प्राचा तु जाहि त इति ङ्स्येकारमुदाहृतं तन्न इत्वविधौ जहातेश्च निश्चित्य यानिर्देशात् लुकालु
ग इति। न लुमतांगस्येति प्रत्ययलक्षणनिषेधात्। प्राचा तु स्वपिस्यमीत्यत्र चमुक्तोऽपि स्वसंप्रसारणेन
दाश्रितं च कार्यं वलवदिति व्याख्यातं तत्तदुभयमपि न। भाष्ये तस्याः परिभाषायाः प्रत्याख्यातत्वात्।
सत्यां वा तस्यां हलादिशेषात् प्राक् पूर्वसंप्रसारणासिद्धत्वभये षाग्रहणावैयर्थ्यापत्तेः। अन्तरङ्गपरि राम
भाषाविरोधाच्चेति संदुर्लभं पदमंजरीधातुवृत्त्यादिषु साक्षिपीत्युदाहृतत्वाच्चेति भावः। तानतीति। चावंता १४१

जहात्यभ्यासस्य न दीर्घ इति केचिदिति प्रक्रियामूलम्। ओहाङ् गतौ किन्त्वादकितः इत्युक्तमा ह॰२
नो दीर्घो नेति तेषामभिप्राय इति प्रसादः ...॰ ६

वतरीत त्रीतिप्रयोगस्तूड तद्दिरहिंसानादरयोरित्यस्य वोध्यः। तपरत्वात्तरतेरीकोऽसंभवात्। नवा र्थीसामञ्जस्यम्। धातूनामनेकार्थत्वात्। १

उरदत्वमिति। गुरणोयङ्लुकोरिति गुरणो नोक्तः। विशेषाभावात्। अभ्यासविकारेषु वाधकान वाधन्त इति ज्ञापनाद्वा। अर्तीति। अर्कितइत्युक्ते नाभ्यासस्य दीर्घः। नापप तत्र्यादेरित्यनेन। द्विरुक्तविषयीभूतद्वितीयेपिपरत एवतत्प्रवृत्तेः। नत्रासिद्वीत्यनु वर्ततइतिहरदत्ताद्युक्तेश्च। आरतीति। इहदीर्घश्छिन्त्यः। यणः स्थानिवत्त्वेनद्व
६ १व लोपइत्यप्रवृत्तेः। नव्यमते दीर्घग्रहणस्यप्रत्याख्यातत्वात् स्वरदीर्घेत्यादिनालो पाजादेशौनस्थानिवदित्युक्तेश्च। यत्तुअभ्यासकार्येतदवयवधात्ववयवादेश ८६
स्यतत्प्रतिबन्धकस्थानिवत्त्वंनेत्यर्थस्याभ्यासस्यासवर्णइत्यसवर्णग्रहणेन ज्ञापितत्वाद्दीर्घः सुलभः। किंवोत्तरपदाधिकारस्यविच्छिन्नत्वादुक्तसाहचर्यपा वपूर्वमात्रस्यासिद्धेतत्साहचर्यादिवासिद्धत्वबाधेनाजर्व्वीइत्यादिसिद्धौवसत्तां

१५२ 152 एर्वग्रहणस्यश्रुतिमात्रेणारेफात्पूर्वस्यदीर्घार्थिनयानदोषइतीनव्यानुयायीकश्चित्। तत्राभ्या
सकार्यइत्युक्तयावातेर्यङ्-न्तात्क्विपिविवाव्तिरित्यत्राद्धोपस्यस्थानिवृत्त्वानिवर्तनादूठोव
लोपस्यचाभावः सिध्यति। वव्रश्चेत्यत्रोरदत्वस्यस्थानिवद्भावार्थंतिदनवयवेत्युक्तम्
अरिपृतीत्यादाविपङ्-सिद्धयेतत्प्रतिवन्धकंस्थानिवत्त्वंनेति। तन्न। उवोरवृद्ध्याये
त्यादौतदप्रतिवन्धकस्थानिवत्त्वसत्त्वात्सवर्णदीर्घस्यदुर्वारत्वात्। नवैवमिय
ङादेर्निर्विषयत्वमन्यथातन्नार्तिग्रहणमेवकुर्यादितिवाच्यम्। एरिवाचवार
त्रोरिवमोमिवेत्यादावावारेक्विपिप्रत्ययग्रहणंविनिमातृरणं [illegible] नव्यानामतेत
दसिद्धेः। इज्जादिलन्हूरणस्यामोनप्रवृत्तिरितिप्रागेवनिरूपितत्वात्। अथप्रत्य
या[illegible]नोतपाएकावोपिस्वसिद्धान्तेहित्वाऽऽमंस्वीकृत्यनिर्विषयत्वंदूषितंहि राम
पूर्वस्यैव [illegible] कार्येस्थानिवत्त्वमितिसिद्धान्तमवलम्बमानस्यतवेदीर्घेग ५२

न्यमप्यजिघृतोऽसवर्णग्रहणस्यज्ञापकतैव नसिध्यतीतियत्किञ्चिदेतत्।तस्मादिय
ङ्ःवज्ञानप्रतिबन्धकस्यानिवद्भावनिवारकंसदसवर्णग्रहणंविशेषविषयकमेवेत्या
रतीत्यादौदीर्घोऽभूदेवेतिसिद्धम्।इत्थंवज्ञाप्यशरीरेऽभ्यासकार्येइत्यादीन्यनेकानि । न्य ३
न्याभावबृंहितत्वेनगौरवग्रस्तानिविशेषणानिव्यर्थान्य निष्टापादकानिचेतिबोध्यम्।
तथाहि।विव्यतुर्विव्युरियतुरियुरित्यादौप्रतिदीव्नइत्यत्रैवदीर्घप्रसङ्गः।ऊचेरवेत्यादि
कंनस्यादित्युक्तमेव।तथायौतेयङ्लुकिवियातिरित्यभ्यासाकारस्यापिलोपःस्यात्।
असिद्धवदत्रेत्यप्रत्याख्यानपक्षेस्थानिवद्भावेनैवाल्लोपोवारणीयः।एवंभवतोक्तज्ञा
पकेनानिषिद्धइत्युक्तानिष्टंदुर्वारमित्यवधेयम्।यच्चोक्तमुत्तरपदाधिकारस्याविच्छि
न्नत्वादित्यादि।तदपिन।आपादसमाप्तितदधिकारइतिसिद्धान्तात्।ह्रलोपसूत्रेविच्छिन्ने
ऽतिचेन्न।स्वरूपकल्पकायङ्ःमाजिनोऽश्वेत्यादौविषयदेशेबाधस्तादृशेविच्छेदेपिरेफांशेउ
त्तरपदाधिकारबाधेमानाभावात्।दूरंस्वारोढ्वत्यूरोत्रेमित्यादौनतत्संभवात्।नवढसा

रूवर्यमानमम्र। न्यायापेन्दू यावचनं व त्लीयइत्युक्तत्वात्। अत एव एकः पूर्वपरयोरित्य
त्रैकग्रहणांसफलमित्यबोचाम। पूर्वत्रासिद्धमित्यस्यबाधनं तु ढांशे स्त्रवलादज्ञवी
इत्याद्यंशे साहचर्यात्। ञापादाहरणाद्वेत्येवेतत्त्वम्रा। ढो लोप एव निमित्तं न द्राविति
व्याख्यानं त्वशुद्धमेवेति तत्रैवावोचाम। तस्मात्कुतिलिञः धिकेरणान्यायेन पूर्वग्र
हणमेव रेफांशे तद्वित्वेदकं न साहचर्यमिति। प्र कृतलन्ध्वेन कथमपि दीर्घसिद्धि
रित्यलं प ल्लवितेन। अरियतीति। वहिरङ्गत्वेन यणोऽसिद्धत्वान्न लोपो व्वोरिति य
लोपः। अन्तरकालिकेवि भावजाननन्तं ये विरहान्नाजानन्तर्य इत्यप्रवृत्तेः। दीर्घः
अरियादिति। एतदपि दूषितप्रायम्। उक्तमुक्ते॥ जा [illegible] द्वितीय
ग्रहीतीति। यत्तु प्रावाग त्वातेर्यङि निमित्ते संप्रसारणे जग्रहीतीत्युदाहरितं तन्नेति भा
वः। [illegible] ओ ग्रहितेति। नन्वत्रेटो दीर्घः कुतो नेत्याशङ्क्याह
ग्रह इत्यादि। एकाच इति। एकाच उपदेश इत्यतः। अनुवृत्तेरिति। एतच्चैकाचो द्वे प्रथमे

स्येतिसूत्रेहरदत्तेनोक्तमितिभावः। माधवस्त्वितोति। तस्यायंभावः। ग्रहोलि
टीतिसूत्रेयङ्लोपेचोक्तम्। किमुक्तम्। तदन्तद्विर्वचनादितिभाष्यम्। तद्दी
यकैयटस्वरूपेर्थालोचनायांयङ्न्तात्तृजादेरिटोदीर्घाऽप्रवृत्तौद्वेयुक्ती
स्तः। पूर्वस्मादपिविधावल्लोपः स्थानिवदितिग्रहेरितिविहितविशेषणानुप
यरोनवेति। तत्राद्यः पक्षो भाष्यवार्तिकरीत्या नपदान्तसूत्रेदीर्घग्रहणं
स्यप्रत्याख्यातत्वादितिनव्याः। तन्न। अत्रैपादिकदीर्घार्थं तदावश्यकमि
तिभाष्यवार्तिकारूढमितिप्रतिप्रतिपादितत्वात्। कैयटनव्याभ्यांपञ्च
मीसमासानङ्गीकाराच्च। तस्माद्विहितविशेषणपक्षएवमाधवसंम
तइतिबोध्यम्। एवंवयङ्न्तेजरीग्र हितेत्यादौ ग्रहेस्तृजादेर्वि
धानाभावाद्दीर्घाभावेयङ्लुगन्तेग्रा ग्रही तेत्यादौदीर्घप्रवृत्तोन
किंचिद्बाधकम्। यङ्लुकोऽनैमित्तक तयातदन्तद्विर्वचनविरहा

त्राद्द्वितीयाजवषिकद्वित्वाभावादिति यावत्। इत्थं वक्तृतद्धित्वस्यापि द्विष्प्रयो
गेस्थानेद्वित्वेवा ग्रहित्वानपायात् ततो विहितत्वमस्त्येवेति। तज्ञाष्यादि
विरुद्धमिति। ग्रहिराङ्कमितीदं भाष्यमादाय ग्रन्थोवो जरीग्रहित्यङ्कं ननुग्र
हिः विशेषणसामर्थ्या यथा श्रुतरूपाश्रयणामिति व्याचष्टे कैयटः। तुल्य
न्यायेन यङ्लुगन्तेपि यथाश्रुतरूपाभावाद्दीर्घो दुर्लभ इत्येतावानेव भाष्य
कैयटविरोधो नव्योक्तोनत्वाधिकः। वस्तुतस्तु यङ्लुक्याल्लिङ्नभाष्यान्क्य
वेमिदत्केयटोदितम्। नव्योक्तंवेस्थिति दृष्ट्वा ग्नि जाग्रहीतामतान्तरम्॥१॥
माधवस्यन भाष्यविरोधः किंतु नव्यहरदत्तादीनामेव। तथाहि। एकाचोद्वे इति
सूत्रे यङन्तं प्रक्रम्य जरीग्रहितादइत्यादौ स्थाने द्विर्वचने संप्रमुग्धत्वात्प्र
तिषेधत्ययस्यनष्टो ग्रहिरितिनेटो दीर्घ इत्युक्ते द्विः प्रयोगेवापि द्विर्वचनेनदो राम
षः। ग्रहिणाङ्कंविशेषयिष्यामः। ग्रहेरङ्गादिति। ननुचैकैकमपात्राङ्गमासमु १४४
दायेयावाक्य परिसमाप्तिस्तयाङ्कं संज्ञा भविष्यति। कुतएतत्। शास्त्राहानेः।

एवं हि शास्त्रमहीनं भवतीति भाष्यम्। न ह्येतस्माद्यङ्लुगन्तो दीर्घो नेति लभ्यते।
मन्त्रूद्व्येपि वृद्धिरूपमङ्गमस्तीत्यवादिष्म। न च विशेषणसामर्थ्याद्यथाश्रुत
रूपाश्रयणमिति कैयटविरोधः शङ्क्यः। तत्राङ्गसंज्ञाप्रवृत्तिवेलायामुतकार्य
प्रवृत्तिवेलायाम्। नाद्यः। यङ्न्तेति व्याप्तेः। यङ्निमित्ताङ्गसंज्ञायां यथाश्रु
तरूपसंभवात्। न द्वितीयः। अलिटीत्यस्य वैयर्थ्यापत्तेः। ग्रहीतमित्यसिद्धेश्च।
न चाङ्गसंज्ञाप्रवृत्तिवेलायां यथाश्रुतरूपं विवक्षितमिति वाच्यम्। परत्वात्सं
प्रसारणेऽङ्गसंज्ञाप्रवृत्तेर्न्याय्यत्वात्। किं च। दृचोजरीगृह इत्यङ्गमिति वद
ता कैयटेन तत्र ज्ञमित्तत्वं विवक्षितमुत यङ्निमित्तकत्वे सतित— संबन्धित्वमा
त्रम्। नाद्यः। ननु चैकैकमप्यत्राङ्गमित्यादि भाष्यस्य शङ्कासमाधानयोरसं
बद्धत्वापत्तेः। न द्वितीयः। द्वितीयैकाजवधिक द्वित्वे गृह्य गृह्य इति संपन्नम्।

तत्र द्विरुक्तिर्नासो ग्रहिः योग्रहिर्नासोद्विरुक्त इति ग्रहस्य भिन्नाङ्गाभावाद्यङन्ते
दीर्घप्रवृत्तावपि यङ्लुगन्ते तत्प्रवृत्तौ बाधकाभावात् । तत्राप्यङ्गसंज्ञाप्रवृत्ति
समयेतस्तुल्यत्वम् । किं च ग्रहितमित्यादौ दीर्घः स्यात् णिच्यङ्लेतस्य यथाश्रु
तरूपस्त्वात् । निष्ठायां नास्तीति तिचेत् किं ततः । एकैकमप्यत्राङ्गमिति भाष्ये
विरोधात् । न हि तत्र विजरीगृह इत्यत्रैकैकमङ्गमित्यादिभाष्योक्तशङ्कासमा
धाने युक्ते किंतु यङ्मादाय । न पदान्तेत्यत्र दीर्घग्रहणप्रत्याख्यानभाष्य
मिक दीर्घमात्रविषयमित्यादि ष्ट्या । प्रकृतं भाष्यमप्यत्र लिङ्गं बोध्यम् । तस्मा
दवयवान्तरानवच्छिन्नत्वग्रहस्याङ्गनिमित्तावयवस्येट इत्यर्थो न कैयटोक्तः ।
तेन यङ्णिजन्तयोर्नातिव्याप्तिर्नापि यङ्लुक्यव्याप्तिः । अत एव मूलकृ राम
दपि ग्रहेर्विहितस्येति व्याचष्टेति बोध्यम् । किं च । यङ्लोपेऽङ्गे दीर्घत्वस्य प्रति १५५

षेधो वक्तव्य इत्युपक्रमे यङ्लुको रित्यादि वक्तव्ये यङ्लोपग्रहणेन यङ्-
लुगन्ते दीर्घ [illegible] निषेधो न। वार्तिककारभाष्यकारयोः संमत इति स्पष्ट-
मेव धीमताम्। उपक्रमोपसंहारयोरेकवाक्यतायां कृत्यो भाष्यविरोधः।
अपि च। पदाङ्गाधिकार इत्यनया गृह्यन्ताङ्गादित्यपि भाष्यार्थो बोध्यः। अ-
न्यथाङ्ग न ग्रहं हि विशेषयिष्याम इत्येव ब्रूयात्। आवन्तं यदङ्गं ततः परस्यया-
द्विधानमिति यथा। अत एव तुल्यन्यायेन यायङ्लुगन्ते दीर्घो दुर्लभ इति
न्नमुकर्त्ति कउपसंहारो निरस्तः। एतेन चतुर्विंशति सूत्र्या विच्छिन्नत्वेन
दुर्लभाम प्येका बड्ड इत्यनुवृत्तिं वदन्तो न व्यवहरदत्तादयः परास्ताः। तस्माद्धे
धापि माधवोक्तं सुष्ठ्वेव। न वैवं यगन्ते प्यङ्लोप यङ्लोपयोः कृतयोरेकदे-
शविकृतन्यायेन यथोद्देशपक्षे ग्रहयन्ताङ्गसद्भावाद्दीर्घः शङ्क्यः। अङ्गादि-
त्यस्याः पञ्चम्याः निमित्तत्वमर्थ इति भाष्यकृता त्यपर्वात्। पक्षान्तरे त्वङ्लोप

सि॰ र॰ ति
१४६
146

स्यस्यानिवद्भावेन ग्रहणात्ताङ्गाभावाद्विहितविशेषणाभावेऽपि न क्षतिः। तथा
पि ग्राहितमित्यादिसिद्धये तदवश्यकम्। एतेनाविहितविशेषणत्वमनभ्युपग
च्छन्तोऽस्थितपक्षमवलम्बमाना नव्यकैयटहरदत्ताः प्रत्युक्ताः। यदपि य
थाश्रुतरूपाश्रयणो हरदत्तमते वा न यङ्लुकि दीर्घस्यासंभवोऽप्यस्ति। ग्रहो
लिटीति सूत्रस्य ग्रन्थास्तूपायस्योपा येत्यादिन्यायेन यङन्तांशे उपा
यान्तरपरतया नेया न तु यङ्लुकि दीर्घो भवतीत्यभिप्रायेणापीत्याहुर्नव्याः॥
तदपि न। उक्तविधया तत्र दीर्घप्रवृत्तेः स्पष्टतया बाष्ठभाष्येण सहितेषामै
करूप्यसंभवे वैरूप्यकल्पनाया निर्मूलत्वात्। एकाचो द्वे इत्यत्रोक्तमेवस
प्तमे यङ्लोपे चोक्तमित्यनेन स्मारितं नार्थान्तरमिति बोध्यम्। ननु चैवै
कमप्यत्रोक्तमित्याचार्यदेशस्य शङ्का। एवंच द्वितीयस्य ग्रहिरूपत्वाद्दीर्घः एम
१४६

कुतोनेतिशङ्किं तु भवि:। आचार्यस्तु चकारसंनिधौ यकारमात्रस्य प्रत्ययत्वाभा
भावात् प्रत्येकमङ्गसंज्ञाविरहे समुदायस्यैकैवसेत्याह। समुदाय इत्यादिना। त
दादिग्रहणाद्घङि परतो गरह्य गरह इत्यस्येत्यर्थ:। न चैवं तङ्गुहि रूपमङ्गसंज्ञा
ग्रह इत्येतत्तु तादृशं भवति। याना द्विरुक्त्यभावात्। द्वित्वस्य द्विःप्रयोगरूपतया ग्र
हे वितत्वान पायाश्च। न वा द्विरुक्ते रूपं भाष्ये विवक्षितम्। मानाभावात्। अ
लिटीत्यस्य वैयर्थ्यप्रसङ्ग इत्युक्तत्वात्। एकैकमप्यत्रेत्यादिभाष्यविरोधाच्च
इत्थं वसमुदायस्यैवाङ्गसंज्ञा न प्रत्येकमित्यभिप्रेत्याह। एवं हि शास्त्रमह
नमिति। न चात्र समुदाये काञ्जिद्वर्द्वनदृष्टान्तो युक्त:। अङ्गादिसंज्ञानां व्या
सज्यवर्तित्वसिद्धान्तात्। एतेन यङ्लुगन्तात्सिजन्ताच्च यङन्ताच्च ग्रहे
रिट:। द्विधा त्रिधा वद्र्धव [illegible] दीर्घप्राप्ति: समाहितेति नव्योक्तं निरस्तम्।

सि.र.ति.
१४७

147

निहितविशेषणानितिभिन्नकानां त्रयाणाम स्थितत्वेन द्विधा त्रिधेत्यादेरसं
भवदुक्तिकत्वात्तत्र यङ्लुगन्ते द्विधादीर्घप्राप्तिरित्येवं यथासंख्यम
न्वयो बोध्यः। आद्ये एकाच इत्यनुवृत्तिर्यथाश्रुतरूपग्रहणं चेति। द्विती
ये विहितविशेषणां [illegible] स्यानिबद्धावो यथाश्रुतरूपग्रहणं चेति। तृ
तीयेस्थाने द्विर्वचनं बहुर्थं त्रयं तु राजन्ते न समानमा एकाच इत्यनुव
र्तनेन वा बहुर्थत्वं ज्ञेयमितिश्लोकार्थः। तस्मान्मुनित्रयमते विहित
विशेषणास्यावश्यकत्वान्माधवोक्तं भाष्यविरुद्धं किंतु नव्याद्यु
क्तमेवेति स्थितमित्यलमतिविस्तरेण। यङ्लुगन्ते दीर्घमिटो मा
धवः प्राह सर्ववित्। महीयान्हरदत्तोपि भाष्यार्थे न व्यवीविवत्। नव्या
दीनां प्रमादे हि किमद्भुतमतः परम्। सह स्वास्थ्यं तात्पर्यं भगवान्वेद

स्प १

राम
१४७

माधवः ॥ २ ॥ जर्गृधीनीति । गृधु अभिकाङ्क्षायाम् । यङ्लुगन्तस्तीति । किं
दप्रदत्तिरित्यर्थकाद्बहुलग्रहणाद्धोके ज्ञापकसिद्धत्वेनासार्वत्रिकत्वा
द्वितिभावः । माध्यद्धनितमिति । तथाहि । क्नोरित्यत्र क्लिङ्ग्रहणमनुवर्तते उ
तनेति विशये । नाद्यः । व्रश्चेति सूत्रे प्रष्टा प्रष्टुमित्यत्र षत्वार्थं छ्ग्रहणमाव
श्यकमननुवर्त्यौतु छ्स्पशादेशे कृते शान्तत्वादेव षत्वं सिद्धमित्यनावस्य
क मिति लाघवम् । न द्वितीयः । घुम्यां घुमिरित्यादावक्लितिम्मामादावप्रू
उप्रसङ्गादिति पन्थाद्द्वयेपि दोषमुक्त्वा परिहारोप्युक्तः । तत्राद्ये छ्ग्रहणं न
तमेवेति दोषाभावः ॥ द्वितीयेपि घुम्यामित्यादावूठस्तु पुनः प्रसङ्गाद्विवउदितु
त्वं भविष्यति । नवान्त्यो दूकारणवस्यादिति शङ्का मः । तत्परत्वसामर्थ्याद्दो

सि·र·ति
१४८
118

षाभावइति। एवं दोषान्तराणामुभयत्रोक्तानि परिहृतानि वा तत्र त्वेतानेव वि
शेषः। अनुवर्तमाने क्ङिद्ग्रहणेऽच्छः षत्वं वक्तव्यं तन्निरस्तो तु दिवऊठ प्राप्नो
तीत्युपसंहारभाष्येण दोषान्तराभावोऽभिहित इति भावः। स्पष्टीकृतमिति। कि
मुच्यते एताने॰ व विशेष इति। या वृतादिवादीनां यङ्लुगन्तानां तिवादि
षु भेदो भवति। ऊढिस्सतिदेधोतीति भवत्यसति तु देदेतीति। नैष दोषः। छा
न्दसे [illegible] यङ्लुकि नैते प्रयोगा दृश्यन्ते। लोके चिहुग्मूर्ग्रहणेन ज्ञापितो य
ङ्लुक् क्वचिन्नैव प्रवर्तत इति भाष्यकारस्य दर्शनमित्येवं व्याख्यातत्वात्तेने
ति भावः। एतेन भाषायां यान्तवान्तानां यङ्लुगन्तोदाहरणां सम्यगेवेति वि राम १५८
दन्तः प्रायो ग्रन्थं व्यावन्दृणा उपेन्द्रस्य एवेति। हृष्यगतो वितिहोतु जाहहि।

अतो हेरित्यत्र प्रत्ययादित्य(प)रुक्थ्य प्रत्ययाकारात्परस्य लुग्विधानान्नेह लुक्
। अत एवासिद्धवत्सूत्रप्रत्याख्यानपक्षे जहीत्यत्र लुग्नेत्यवोचाम। उवरत्वे
र। ऊठ्स्यादिति। स्थानिभेदेनादेशभेदस्यावश्यकत्वादुपधावकार
योः स्थाने द्वावूठौ स्यातामित्यर्थः॥ तयोश्च सवर्णदीर्घे जूः जूरौ जूर
इत्यादि ज्ञेयम्। मामाव इति। लोपो व्योरित्यत्र भाष्ये वस्य प्रत्याख्यात
त्वाच्छ्वन्त्यमेतत्। राल्लोपः। वलि लोपेन सिद्धेनेन वलोपविधानमूठो
बाधनाय छ्वस्य तु षत्वं बाधितुमिति भावः॥ न धातुलोप आर्धधातुके॥

सि॰र॰ति
१४९
149

धातोर्लोपो यस्मिंस्तद्धातुलोपमार्धधातुकम्॥ निमित्तत्वं च सप्तम्य
र्थः॥ धातुशब्देन धात्ववयवो लक्ष्यते॥ संपूर्णस्य धातोर्लोपे गुण
वृद्धिप्राप्त्यसंभवेन निषेधवैयर्थ्यापत्तेरित्याशयेन व्याचष्टे॥ धात्वं
शेत्यादिना॥ आर्धधातुके पर इति॥ तन्निमित्ते इत्यर्थः॥ तेन मेद्यते छे
द्यत इत्यादौ न गुणनिषेधः॥ णयन्तात्कर्मणि लट्॥ इक इति॥ एत
द्विको गुणवृद्धी इत्यतोऽनुवर्तते॥ तेनाभाजि रागः इत्यादौ न निषेधः॥ राम १४९
लोलुवः पोपुवो मरीमृजः सरीसृप इत्युदाहरणानि॥ यङन्तेभ्यः पचाद्यच्॥ त

हरदत्तोक्तसूत्रस्थापनप्रकारमवधेयम्॥४

त्रिमित्तो यङो लुक्। ततोऽनेन गुणवृद्ध्योर्निषेधः। प्रकृतेस्यसूत्रस्य आर्धधातुकग्रहणफलं वक्तुमु
पन्यासइत्याह। इतीनेहेति। यत्तत्र नव्याः नेह निषेध इति प्रतीकं गृहीत्वा सूत्रस्योदाहरणं त्वलोलुवः
यो पुपुवद्वत्यादि बोध्यं। न चाल्लोपस्य स्थानिवत्त्वादेव लघूपधगुणो न भविष्यतीति वाच्यं। उवङ आदिष्टाद
चः पूर्वत्वेन लघूपधगुणे कर्तव्ये स्थानिवत्त्वाभावादिति मनोरमायां व्याचख्युः। तत्र संदर्भशुद्धिर्दर्शि
स्सूत्रस्योदाहरणं त्वित्युक्त्वा न चाल्लोपस्येत्याद्युक्तेरसंबद्धत्वात्। अत्र हलादेशत्वेन स्थानिवत्त्वशङ्काया
दु६ एवानुत्थानात्। अथ भाष्यप्रदर्शितरीत्या परत्वादीयस्य हल इत्यस्य योगविभागाद्वाऽतो लोपे कृते नेयं प्रकारमा
त्रस्यैव लुगिति प्रत्याख्यानपक्षमाश्रित्य ब्रूषे तर्हि सूत्रस्योदाहरणं त्वित्याद्यसंबद्धम्। अथ
यङ्लुङ्नास्तीति चायं कीदृगित्यादौ दीर्घोच्चारणमनन्यार्थमिति यङ्लुगर्थमित्युक्तं वीभावेनु संवी
तः संवीतिरित्यादौ नत्सावकाशमिति भावः। विषयत्वासंभवेनेति। आदेशप्रत्ययोरन्तरकालिको यार
ताविनाभावित्वमेवतत्त्वमित्यर्थः॥ ॥प्रकृतिप्राचुर्ययुक्तेश्चानैङ्रलाकरेलो। यङ्लुगन्तम गात्स्थानि
स्थानिद्वारोवङोनादिष्टादचः पूर्वत्वेनाद्वयोपस्य स्थानिवद्भावे लोलुवादेर्नोपधागुण इति कैयट
कौस्तुभयोर्हरदत्तोक्तरवरातन्मुखे न भाष्यसमर्थनात्॥४

वेंकटेशप्रसादतः॥ ॥इतियङ्लुगंतप्रक्रिया॥ ॥सुप आत्मनःक्यच्। चिन्त्वंनस्वार्थीप्रत्ययस्वरेणाधा
तुस्वरेणवासिद्धेनापिक्यचिचेत्यत्रविशेषणार्थमन्यथापिकाकःश्येनायतेइत्यत्रापीत्वापत्तेरिति।
नदनुबंधकपरिभाषयेष्टसिद्धेः। किंतुसामान्यग्रहणाविघातार्थंनतुककारस्तुसामान्यग्रहणा
र्थः। तेननःक्यइत्यत्रक्यचःक्यङोग्रहणंसिद्धं। समिधकः। समिधितादृषदकः। दृषदितेत्यादावुक्तलोप
स्यस्थानिवद्भावाद्गुणावृद्ध्यप्रवृत्तिरकारस्यप्रयोजनं। किंचपुत्रीयतीत्यत्रशबकारेणैकादेशउदा
दात्तःस्वरितो। इहचकर्मणइच्छायांवेत्यनुवर्तते। संनिधानादिच्छाप्रत्ययवकर्मेत्याह। इषिकर्मणइति।
आत्मशब्दोन्यव्यावृत्तिपरः स्वशब्दपर्यायः। आत्मनइत्यत्रेच्छापेक्षयाकर्तरिषष्ठी। इच्छामात्र
स्यात्मकर्तृकेनव्यावर्त्याभावाद्ग्राहः पुत्रमिच्छतीत्यत्र। नित्यात्मेच्छनापिकर्मणि। स्रग्धरीरित्यस्य
विधायकस्यवैयर्थ्यप्रसंगात्। नहितदाहारादिभ्यःक्यच्संभवति। किंतुशेषे। सुपइत्यनेनसंबंधात्।
प्रत्यासत्त्येच्छयासंनिधापितपष्ठितेवात्मागृह्यतइत्याह। षष्ठ्यन्तसंबंधिनइति। सुबंतस्यार्थद्वारकसंबं

धित्वं कर्मत्वं च। संबंधश्च जन्यजनकभावः स्वस्वामिभावादिर्वेति यथायोग्यं द्रष्टव्यं। पुत्रीयती
ति। क्यजंते नैव कर्मणः संग्रहादकर्मकोयं। तेन ततः कर्मणि नलादयः। षष्ठ्यर्थस्याप्यंतर्भा वा
दात्मन इत्यस्य न प्रयोगः। अत एव चैत्रः पुत्रीयतीत्यादौ कर्तृवाचकात्प्रातिपदिकार्थमात्रे प्रथ
मैव भवति। आत्मनः किं। राज्ञः पुत्रमिच्छति पुरोहितः। न चेह सापेक्षत्वेनासामर्थ्यान्न क्यजिति वाच्यं। म ४
आत्मनः पुत्रमिच्छतीत्यत्रापि तदनुत्पत्तिप्रसंगात्। पुत्रशब्दस्य नित्यसंबंधिशब्दत्वान्न दोष
इति चेन्नापरेच्छायामपि तदुत्पत्तेः। तस्मादिच्छापेक्षा कांडं ततो ऽकर्मक एव। आचारे त्वि[illegible] यतिद्वि
जं पुत्रीयति छात्रमित्यादौ सकर्मकः। द्विकर्मणीति तत्र मतः उपमानकर्मणोंतर्भावेप्युपमेयकर्मणो
नंतर्भावात्। ननु कर्मणः इत्येव सिद्धे स्वग्रहणं व्यर्थं। तद्धि प्रातिपदिकनिवृत्त्यर्थं वा स्याद्वाक्यनिवृ
त्त्यर्थं वा। नाद्यः। विशेषाभावात्। न च राजीयतीत्यादौ पदत्वविरहान्न लोपो न स्यादिति वाच्यं। नः क्ये इत्य
नेन तत्सिद्धेः। स्वं बंतात्क्यच्युत्पत्तौ परिसंख्यात्वापत्त्या गौरवप्रसंगात्। न द्वितीयः। विशेषविधिर्हि तेन सनाथा।

सि॰ रु॰ ति॰
१४५
145

नोः क्यचो बाधावश्यंभावादिति चेत्सत्यां महान्तं पुत्रमिच्छतीति वाक्यान्माभूदित्येवमर्थं तदित्याशयेनाह।
स्वन्तादिति। प्रत्ययग्रहणपरिभाषया नेन न्स्वन्तं। नवकर्मणा इत्यनेनैव वाक्यव्याहृतिसंभवेना
र्थः स्तु व्यवहारो नेति वाच्यं तस्य पदविधित्वसंपत्त्यर्थत्वात्। नवकर्मणा इत्यनेन पदविधित्वं ल
भ्यते ऽपदस्याधिकर्मत्वाविरोधात्। धातोः कर्मणः इत्यत्र यथा। कर्मणा परा इत्यादौ तत्पदत्व
स्यानर्थत्वात्पदविधित्वं बोध्यं। तेन महान्तं पुत्रमित्यत्र पुत्रशब्दान्न क्यच्। असमर्थपरिभाषोपस्थित्या सा
पेक्षत्वेनासामर्थ्यात्। सविशेषणानां वृत्तिर्नेति निषेधाच्च। महापुत्रमिच्छतीति विग्रहे तु महापुत्रीयतीति
भवत्येवेति बोध्यं। नन्वेवं मारावकं मुंडयतीत्यादौ णिजिव मारावकं मुंडमिच्छतीत्यत्र क्यजपि स्या
न्नणिचः क्यचो वैलक्षण्यस्य दुरूपपादत्वादिति चेन्न। मुंडमिश्रेत्यत्र सापेक्षेभ्योपि केषांचिन्मुंडादी
नां ग्रहणं विध्यर्थमिति वक्ष्यमाणत्वात्। किंच वृत्तिवाक्ययोः समानार्थकत्वाभावादपि मुंडशब्दात्त्रे राम
च्छायां क्यच्। मारावकं मुंडीयतीत्युक्ते ऽपि आचारार्थस्यैव प्रतीतेः। तदुक्तं हरिणा। सदपीच्छा क्यचः कर्मत ४५

दाचारक्यचाहृतं।वाक्यवाच्यमुतोव्यक्तेर्पर्याय।ऽभ्यासः क्रमादिष्विति।अभ्यासःपौनःपुन्यं।तस्मिन्नर्थेग ३४
त्यर्थेभ्यः क्रमादिभ्यो धातुभ्यायङ् नभवति।चं अभ्यतइत्युक्ते कौटिल्यस्यैवप्रतीतेरितिदृष्टांतार्थः।नद्द
त्युक्तेनेयिवाक्येनबोध्यमयाष्टाकमेव तेसत्यांनप्रतीयते अतः अस्मात्क्यचोव्यक्तेराचारार्थस्यैवप्रती
तेरनोवाक्यादिष्टाकमेराःप्रतीतेरितिवेतिक्यचोनेवोत्पत्तिरित्यर्थः।अथवामुंडादयोगुणवचनास्तेन
नित्यसापेक्षत्वासिद्धभविष्यतिनक्यचातदाचारक्यचाहृतमित्युक्तत्वात्।यत्रकेपुटःवचनसा
मर्थ्यात्सापेक्षेभ्योपिमुंडादिभ्यःप्रत्ययोभवति।क्यच्प्रत्ययस्तुनिरपेक्षे वासिद्धेस्तस्माद्वृत्तिवाक्ययो
स्तुल्यार्थत्वाभावान्मुंडशब्दादिष्वर्थेनक्यजितिदिक्।गम्यतीतिगो।अस्मद्भ्यः पुत्रादिभ्यःसावका
शइतिमाराकं मुंडमिच्छतीत्यादौसापेक्षेभ्योनभवतीत्याह।नदउक्तं।नित्यंसंबंधिसापेक्षत्वेनपुत्रादीनांनिर
पेक्षस्यांदशायामेवांनरंगमपिविभक्तिकार्यंबाधित्वात्तपोलुकिवांतादेशःगम्यतीतिनन्वेवंतुदा
हरणमपुक्तंगोसमानाक्षरनांतात्क्यङ्वक्तव्यइत्येकइतिभाष्यप्रकृतीनांपरिगणनात्पुत्रीयतिदधीयति
२ त्वासिद्धः।तस्माद्वृत्तिवाक्ययोस्तुल्यार्थत्वाभावान्मुंडशब्दादिष्वर्थेनक्यजितिदिक्।गम्यतीतिगोऽ

सि॰टि॰ कर्त्रीयति। राज्ञीयतीत्यादावेव क्यजि तुक्ते रिति चेन्नान धातुलोप इत्येस मिथिता दृषदक इति क्यङन्त
१४६ मुदाहरता भाष्यकृतैव तस्य कवचन स्यानादृतत्वात्। इहैव केयटोपि वाच्यती त्याघ सिद्धिप्रसंगाद
146 व्याप्युक्तमिदं वचनमिति स्वचपितं मतं जिरभाष्यकारेणोपन्यासीति व्याख्यातः तस्मात्संध्य हारोते भ्यो
हलं तेभ्य पस्वक्यजिष्ट एवेति भावः। नःक्ये। वयच् क्यङि ति। क्यष् नुहलं तेभ्यो नास्तीति सिद्धांतात्रेतोक्त इति
भावः। संनिपातेति। गव्यामित्यादावोकार यकारादि प्रत्यय संनिपातेन कृतोवांता देशस्तदुभय संबंध
विघातनाय निमित्तं न भवतीत्यर्थः। धातोरित्येवेति। सिपि धातोरुर्वेत्यतो धातोरित्यनुवर्त्तत इति हृ
तावुक्तत्वादिति भावः। पुर्पतीति। पुर इति शब्दमिच्छतीत्यर्थः। अत्र तरंट वा धातुत्वान्न दीर्घ इति माधवोक्तं सं
गच्छते। मलकं तु पर्थश्रुतामिपाये राहु घति। प्रत्युदाहरणं चिंत्यमिति। प्रकृतिवदित्यतिदेशादनु
करणमपि धातुरेवेति कथं चिंत्यता त्यर्यसंतन्नेयं। एतेन कौस्त्कभोक्तमपि माधववदूषणं निरस्तं। प्र राम
वः ग्रामादिकइति। हृतिग्रंथविरोधादिति भावः। यत्तुक्तिं वंतस्य धातुत्वमस्तीति दीव्यतीति दीर्घः स्यादेवेति ४६

प्रसादहृदवोचत॥ तत्राक्ठोदुर्वीरत्वात्॥ विचित्तउपधायुरा॥ वल्लोयपयोः प्रसंगाद्वा॥ क्यच्योर्श्चेति॥ आप
त्ययकारस्यलोपविधा॥ यकंस्मारितं॥ वाच्यतीतिववि स्वपीतिसंप्रसारणंतुसंज्ञापूर्वेकत्वादि हनेयो
नोः कार्यमुच्यमुच्यमानंतत्प्रत्ययेभवतीत्युक्तेश्चाहर्यतिगीर्यतीत्यादौहलि चेतिदीर्घस्समरलोको
वर्णमात्राश्रयत्वाद्भवत्येवेतिनदोषः॥ क्यच्चक्यङोरिति॥ इहप्राचाक्यपपुक्तसज्ञाप्यविरोधादपु
क्तंक्यच्चक्यङोरिति॥ नायंक्यषृहलैनाद्धिधीयतइतिभाष्यान्नोक्तः क्यषितिभावः॥ क्यविमांताव्यय
प्रतिषेधइतिवार्त्तिकंयथाश्रुतमनुपपन्नमित्युपपत्तिपूर्वकंतदर्थमनुवदति॥ मांतप्रकृतिकेत्यादि
नाम्मांतादिस्त्युक्तोपुत्रमित्यादौनस्यात्पुत्रोयुच्चानित्यादावेवस्यात्॥ अशनाय॥ अशनायतीत्यादि
स्तुधिसत्यामेवभोक्तुमशनमिच्छतितदानीमेवपातुमुदकंसत्येवधनेपुनर्धनमित्युदाहरणात्र
यस्यक्रमेणार्थोबोध्यः॥ पदान्तकालांतरेसंग्रहीतुमशनमुदकंचेच्छतिपश्चादि दिः संश्चनंतत्रधनीय
त्यादिप्रत्युदाहरणानिक्रमेणाज्ञेयानिबुभुक्षादयश्चेहप्रयोगायाधपः॥ अन्येतुअशनायतीत्यादाव

सि॰ति॰ विशिनष्टिप्रकृत्यर्थं तु भुक्षादिकमेवार्थः। उदन्यात्तु पिपासात् स्यात्। किमु धनं धनायितुमिति निबन्धं तु योगोप
१४७ मारविप्रयोगादित्याकूः। अश्व[illegible]क्षीर। आङ्गसेरसुगित्यतोऽसुगित्यनुवर्त्तत इत्याह। अ
147 सुगागम इति। अयमस्त्रभंगेन हेस्त्रेऽर्थभेदात्कर्त्तव्यो। तत्राघेपथ्या। अश्ववृषयोरिति। अश्वस्य
तीति। मैथुनायेच्छतीत्यर्थः। एवं वृषस्यति। त्रापि पतङ्गमिरामो हवृषस्यंती हवृषस्यंतीत्र कामुकीइत्यादौ
प्रकृत्यर्थत्यागेन मैथुनेच्छामात्रे प्रयुज्यते। तत्तु लक्षणयेत्यवधेयम्। द्वितीयमाह। क्षीरलवणेति। त
स्माधिके अभ्यवजिहीर्षाधिके च लालसा। तेन क्षीरलवणयोर्लालसा रूपापामित्यर्थलाभेन
क्षीरलवणो अतिशयेनाभिनिविशतीत्यर्थः। अत्र प्रकृत्यस्तुगकारस्य सवर्णदीर्घं बाधित्वा पररूपम
वति अकारोच्चारणं तु पूर्ववस्त्वोदाहरणोज्ज्ञालसाससः यितरइत्यादौ चरितार्थमिति तथा सर्वप्रातिपदि
केभ्यः इत्यनेनानकारान्तेभ्योऽसुक् स्वच्छादध्यनिमधु स्यतीत्यादौ चाकाम्यच्य्वाचित्वंव्य थंधातुस्वरेणासिद्धत्वात्। राम
काकारोने संज्ञः प्रयोजनाभावात्। आर्धधातुकत्वाभावेन गुणनिषेधार्थत्वायोगात्। नापि वाक्याम्यतीत्य १४७

त्रवचित्स्वयोस्तुसार्थेकिन्त्वं। धातुप्रत्ययेएवतदित्युक्तेः। चशब्दस्तुकयजन्तुकर्षणार्थः। तस्य चेह फलाभावे
पित्वन्नरस्त्वेऽयमानादावारइत्यत्र कयचएवसंबंधो [illegible] नत्व ने नरस्यापि काम्यचइति भावः। पु
त्रकाम्यतीति। इच्छा क्यङन्तवदसावव्ययकर्मकः। यशस्काम्यतीति। सोऽपदादाविति सः। कर्तुः कङ्ः। सेति
तु प्रषष्ठीकं कर्तुर्विशेषणं। चस्त्वन्वाचयशिष्ट इति स्य चयतिः। सोन्तस्यान्विति तिने नालोन्त्यस्यत्यं तस्यस
स्यैवलोपः। सारसायते इत्यादौ सनेति भावः। यत्तु विद्वस्यमानः शास्त्रेबोधिकारीति भाष्यमन्यासुक्तं तन्तु क
ङन्तात्वष्ट्रःशानविसाधुपन्तु तद्धायख्यं त्राकस्य नरस्कृतः कयंतादित्युक्तं। तन्त्रानापंह लंताद्धिंधीपतइ
तिभाष्योन्त्याकाशिकोक्तस्य लोहितादेरा कृतिगणात्वस्य चाप्रमाणिकत्वान्न लोपो वेति वाग्रहणास्य कय
ङ् लोपाभ्यां संबंधस्वीकारादिति भावः। ओजसप्सर इति। ओजसोप्सरसो नित्यमित्येव भाष्यवार्त्तिकयोः स्थि
तौ इतरेषामित्यादि नु फलितार्थकथनमात्रं। अत एव वृत्तिकृत्पयसस्तु विभाषयेत्युत्तरार्धम पठीत्। तात
त्पर्ये यीग्रहणमुपलक्षणं। वोध्यं। सलोपो वा वक्तव्यः। पयायते पयस्यते इति भाष्योदाहरणास्यापि संकोचक

सि॰ सू॰ टि॰ त्वात्। तस्मान्मूलस्य न भाष्यवृत्त्यादिभिः सह विरोधः। यत्तु भाष्येऽप्य सस एव नित्यो लोपः। इतरेषां सं
१४८ तानं नैव सः। अजायमानं यो अहिं जघानेत्यत्र तु छांदसो लोप इति। अपरस्त्वाह इत्यादिना मतांतर
148 मुपन्यस्तानन्तु पूर्वोक्तभाष्यवार्त्तिकविरोधादसंजातविरोधन्यायेन चोपेक्ष्यं। तथा च कैयटः। मत
भेदप्रदर्शनायोपन्यासो न त्वयं स्थितः पक्ष इत्याहुरित्याह। सपत्नी वेति। एतच्च त्रिविधसाधारणं
विग्रहवाक्यं। सपत्न्या यत्न इति। शत्रुवाचकात्सपत्नशब्दाद् आङ्ः खादित्वान्ङीन् ततः कयङ्। सपत्नी
यत इति। समानस्वामिकवचनस्य भाषितपुंस्कस्य नित्यं सपत्न्यादिष्विति नान्तादेशो नान्तत्वान्ङीप् त
तः कयङ्। सपत्नीयत इति। विवाहजन्यसंस्कारविशेषनिमित्तकपतिशब्देन समासे सति नित्यस्त्री
त्वान्न पुंवत्ता। युवायत इति। यौवनं न जातिः। अनित्यत्वात्। अत एव युवजानिरित्यत्र परस्मिन्नित्य
त्वभाष्येनानुपपन्नमतः। न जानेभ्योतिनपुंवत्वनिषेधः। न चैवं युवनितरेत्यत्र तसिलादिष्विति पुंवद्भावः। शं राम
क्यः। आपस्त्वेतदर्थं भाष्योदाहरणात्सनेति कैयटेनोक्तत्वात्। पठीमृदयते इति। एवं यदि न पुंवत्ता क्यङ् १४८

परत्वाभावात्। याचिकायन इति। सति पुंवद्भावे इकारो न श्रूयेतेति भावः। भस्त्र न पूर्वादपीति। एतत्स्व
हक्सूत्रस्थशब्दकौस्तुभखंडनग्रंथं वस्तुकाभस्प्रत्ययादिनिरस्त्रे प्रसंगान्मयाकारि नितनए ववोद्धव्यः।
कपडेवेति। अयं भावः। अवगल्भादिवार्त्तिके वगल्भग्रहणं क्विबंशे नियमार्थमवगल्भशब्दा-
देव क्विप् न केवलात् तेनोपसर्गात्तरपूर्वादिति। अनुदात्तेत्त्वप्रतिज्ञानांशे त्वपूर्वविधिसंज्ञाघ्र
अयमादिनि लाघवादनुदात्तेत्त्वप्रतिज्ञामात्रे रौवाप्यपतो विधिद्वयांगीकारे वाक्यभेदापत्ते स्तत्रैव धन ति५
यत्राहातङ्केतिन्ववितमिति। उ नरवार्त्तिके न क्विम्मात्रे स्तु करमिति भावः। इत्थं चाचारे गल्भ निग्र
ल्भतीत्यादिफलकत्वेनावगल्भग्रहणमावश्यकमिति न व्यमन्तेभूतपूर्वादप्यनेकाचक्रा
मएतद्वार्त्तिकारंभसामर्थ्यादिति यशेन सह परस्पर [illegible] मतीत्यादिफलकत्वेनावगल्भग्रहणा
मावश्यकमिति न व्यमन्ते भस्तन पूर्वादप्यनेकाचक्राभएतद्वार्त्तिकारंभसाम [illegible] विरोधः कथंनेति
न व्याएवपूर्वव्याः। यत्तु प्राचाः चारे गल्भेत्यादिनिरुपसर्गमेव पठित्वा गल्भत इति केवलात्तङ्

सि॰र॰नि दाहृतनमदाकरविरोधादयुक्तमेवेतिभावः॥हरदत्तमाधवमतमाह॥प्रत्ययग्रहणमपनीयेति॥ए
१४९ तच्चभाष्यविरुद्धत्वाच्चिन्त्यमेवेति॥अवोवामाजेनआमासत्रोवभ्रुवेत्यादिकमेवभाष्यसंमतमि
149 त्यवधेयम्॥एवंस्थितेर्वाचीनपक्षमाश्रित्याह॥नामिति॥अतोगुणादिति॥अंतरंगत्वादतोलोपेवा
धित्वेतिभावः॥इतिमनोरमा॥एतदुभयमस्खलन्त्खलुरित्यत्रान्यमस्खलीने ज्ञादेर्गुरुमतइतिसत्रेइपेष
त्वोषुतिभाष्येणचसहविरुद्धत्वात्स्म लकारेण॥पूर्वपररूपापत्तौ वा इत्येवरूपापत्ते श्वास्तु द्वावा
र्यौ परिभाषामंतरेणोभयत्रनिर्वाहाभावात्॥एवंचप्रकृतेपररूपंबाधित्वावार्त्तिकेनानतोलोपे
चिणोलुङ्न्यायेनासिद्धत्वात्पुनरल्लोपाभावेनआदेरितिदीर्घे वृद्धिरेचीति वृद्धिरित्येवंसाधुनि
कायुक्ता॥अन्यथामाधवमतेओइतिरूपंनस्यात्किंत्वइत्येवस्यात्॥पूर्वमेवपररूपेणापल्लोपा
विति वचनाद्वृद्धिंबाधित्वातोलोपेकृतेणालेवस्थापेतानवेष्टायति॥माधवमतेपिओ॥अत्रारित्ये राम
वरूपमितिकौमुमविरोधात्॥नचवृद्धेरपिपरत्वादतआदेरितिदीर्घेकृतेणालओत्वंसङ्कारमितिवा १४९

व्यमाणपक्षो पावित्यत्र दीर्घग्रहणस्यापि सत्वात् । पुरस्तादपवादन्यायेनोदोषाभावेपि बाधसामान्य
चिंतायां दोषध्रौव्यात् । व्याप्यापेनु व्याश्रयत्वाद्वा शेति हि न प्रवर्तत इति न व्याप्तं तन्नादुरवनुधित्यादौ स्वो
क्तसर्वग्रंथविरोधादेकादेशविषये व्याश्रयत्वं नास्तीत्यवः परस्मिन्नित्यत्र कौस्तुभखंडनाव
त ४ सरे प्रतिपादितत्वाच्चेति दिक् । अन आदेशितिदीर्घ इति । पररूपस्यांगग्रहणेन ग्रहणान्यग्रहणास्स
मानाश्रयत्वेनांगग्रामममतो लोपमपि परत्वाद्बाधित्वेति भावः । आलोप इति । ननु अ अ अनु
स्य इति छित्तेन व्यात्क व्याश्रयत्वस्य दूषितत्वेन समानाश्रयतया पररूपं बाधित्वाऽऽतत्र आदेशितिदी
र्घेऽतो लोपइत्यनेन लोपे तस्याभीयत्वेनासिद्धत्वादातो लोपाप्रवृत्तौ सवर्णदीर्घेऽअनुः उसिनुप
ररूपे ऽउरिति च रूपाभ्यां भाव्यं पूर्वस्यैव विधौ स्थानिवत्वं न पूर्वपरयोर्विधाविति प्राचामेति चेन्न
न्यमेवेतत भाष्यादिग्रंथस्यात्रोदासीनत्वात् । यदि तु प्रामाणिकग्रंथादनुः उरित्यवलहं समभि
नंस्यात् तर्हि वार्णीपरिभाषया अनित्यत्वं शरणं । कर्तव्यं डीसाहचर्यादिति । पंचमीसमासप्रत्याख्यान

मभिप्रेत्येदं चकारेणतस्तु तद्दूषयित्वा पंचमीसमासश्चावश्यक इति स्थानिवत्त्वेनैव सौलेयिनेत्यवगंत
व्यम्॥ विवायेति॥ इदं चार्वाचीनमते॥ भाष्यमते तु वयां चकारेत्येव॥ एवं शिश्रायेत्याद्यपि भाष्यासम्मत
मिति बोध्यं॥ अनुनासिकस्य क्वि॥ नेह माहृच्चर्याद्दानो विहितः क्वि वेवय्य इत्येने किंत्वाचारक्विवयि अप्य
क्वियोऽत्रेव वक्कारस्य सामान्यग्रहणार्थत्वाद्यकारस्य चैतद्विघातार्थत्वात् [illegible] नेनाचारक्वि
प्यपि दीर्घः सिद्ध इत्याशयेनाह॥ इदामतिराजानतीत्यादि॥ एतच्च साधवमतो हरदत्तग्रंथे तु राडननिद्धम
नीति ह्रस्वपाठो दृश्यते कौशेयप्येवं॥ साहचर्यबाधे मानाभावात्॥ न चानुबंध एवमानां बेरष्ट क्रेस्यैत्य
त्रास्यैवग्रहणं मा भूदित्यनुबंधस्य साफल्यात् इति कौस्तुभे मनरूपं स्थितं देवतीनाः अपदांतत्वा
द्विकदित्युत्वं न॥ ऊठूत्तु नासिलाघनुनासिकादिसाहचर्येण धातुप्रत्ययस्यैव क्वियो ग्रहणात्॥
ऊठीति॥ साहचर्यमनित्यमिति भावांघवतीति॥ गुगंतेति गुणंवाधित्वांतरंगत्वाद्गुणः॥ अंतरंगेय राम
शोकत्वेच्छेडूना सिद्धः॥ नाजानंतर्ये इति निषेधात्॥ आगत्वादुगरोऽस्या दित्यपि न॥ स्योन इत्यत्रेव व्या॥ १५०

अयत्वादिति भावः। उचितमिति अनुनासिकस्य कीत्वमसाधवेन साहचर्यं नाश्रितं ह्रस्वोरित्यत्रापित
स्येव क्ङिपोऽनुवर्तनादिति भावः। प्राचोक्तमनुवदति। यत्विति। अनाकरमेवेति। हरदत्तमाधवादिमहा
ग्रंथविरोधादिति भावः। वस्तुतस्तु भाष्यवार्तिकविरोधे महाग्रंथानामप्यप्रामाण्यमित्युक्तमेव। किंच।
न केवलं भाष्यादिविरोधो हरदत्तादीनां किंतु परस्परविरोधोऽप्यस्ति। हरदत्तस्तु चकाविति ह्रस्वः
व: ५ ह्लोपाविति घाश्रित्य च केत्याह माधवस्तु न व्येष्वेव भयं साधुत्वेनांगीकृतं तस्मात्परस्परविरोधाद
प्यप्रामाण्यं ध्रुवमिति स्वामासस्त्वां चकारेत्यादि प्राचोक्तमेव रमणीयमित्युक्तं विस्तरेणाभ्यशा
दिभ्यः। अच्चेरिति ग्रन्थे काभिप्राये गौकवचनं नासौ प्रसज्यप्रतिषेधः। गोस्त्वाते वैयर्थ्यापत्तेः। भवत्य
र्थे क्यङ् च्विरप्रितन्त्रोक्तार्थन्यायेन ह्यंतान्न क्यङ् न भविष्यत्येवेत्यतः पर्युदासएवानस्य च सदृशग्र
हिल भिप्रायेणाह। अन्तत इति। क्यङ् स्यादिति। भृशादिभ्यः सर्वेभ्यो विशेषेणेति भावः। तेषु
चे यहलं नादृष्टास्तेषामन्यस्य लोपोऽन्वाचयशिष्ट इत्यर्थः। प्रातिपदिकमिति। न तु धातुः। तथा च वद्द्यमाणा।

सि॰र॰ति ज्ञापकाद्व्यपनेरिति भाव। अनुबंध इति। पररूपेणाद्याक्कारौ निर्दिष्टौ। तत्रान्त्यस्येत्संज्ञकत्वादनुदात्तेद
१५१ यं। अन्यस्य करणाव्यलोपि चार्थः। तेन चङ्परे णौ यथा ऊत्वो नेति। शुद्धेयोयमिति। शुद्धे केवलो नास्ति ना
प्युपसर्गान्तरं श्चेद्दृति यदि शेषसिद्धसंशद्धपूर्वकत्वमित्याशयेनाह। सामर्थ्यादिति। पूर्वपदमिति। तत्र
समास एव संभवतीति तेनांदोलयितास्त्री लयित्वेत्यादौ आप्रेत्यादीनां न ष्ठयकरणामिति न्यापवन्त
तस्य पूर्वपदमिति पूर्वपदमिति। मन्त्रसमासस्य वसंभवेयौगिकग्रहणेपिन दोषः। आंदोलयत्यादी
नां धात्वंतरत्वेनापूर्वेपारयद्वस्था यवकरणाभावइति वक्तुं शक्यत्वात्। एवमवधीरयतीत्यादावप्यन्य
५७ स्य नष्टैकरणं बोध्यं। अत एवाडागमं वशद्वृद्धित्वं च कृत्वात्राववधीरदित्युदाहरन्नोपदेवः। वकुलमेतन्नद
र्शनामिति वकुलस्य महसोनसंग्राहत्वाविशेषाद्धीरेत्यपि धातुः कल्प्यः। तेनेतीवधारामवधीर्य मंडली
तिश्रीहर्षस्य प्रयोगववधीर्य धैर्यपरिरंभेति माघस्य च ल्यपि वेत प्रयोगेपि साधुरित्यवधेय मा संग्राम अशाह्देतु पूर्व राम
कूरणाभावादसंग्रामयत। संग्राम यिवाऽसंग्रामतेत्यत्राट् समः प्रागेव भवतील्यमुनाद्वित्वंतु समएवे १५१
प ३ स १

निसिद्धं। ज्ञापकफलमाह। मनःशब्दात्त्यागिति। सुमनसः उन्मनसः अभिमनसः दुर्मनसः इति भ्रंशाद्द्वैव
स २ र्व्विरः सोपसर्गाः पञ्च ते तेभ्यः क्यङ् उन्मनायते ल्यप् द्विर्वचने ष्ठ अनिष्टप्राप्ते तस्य पृथक्करणाज्ज्ञानाव नंत
भूतत्वेन मनःशब्दात्त्यागे वाङ् भवति ल्यप् द्विर्वचने च यथा भवतः इत्यर्थः। सुमनायते इति। अन्त्यस्य
हलो लोपे ऽक्त्सावेति दीर्घः। ल्यपः। सुमनाय्य उन्मनाय्य। द्वित्वस्य। सुमिमनायिषते अभिमनायिष
त इत्यादि। ओदाधि त्वेति। इह डो धात्वं तगीतत्वे न ह्केनेन समासाभावात् ल्यपि विति भावः। उन्मनाय्येति।
ननु उदः मनःशब्देन सार्द्धं समासो जात एवेति क्तेनेन पुनः समासाभावात् कथं ल्यपि विनिचेत्सत्यं पृथ
क्करणे न समासस्येव निषेधात् क्तेनेन समासे ल्यप् स्त करणे वेति यूहा। अत एव वागत्य भूत इत्यत्राव
वशाद् सान्निध्यमात्रेणागत्य भेति प्रातिपदिकमात्रात् क्विप् एवं रूपसिद्ध्यति। समासनिषेधाभावे त र्व्व निद्ध
यायुदत्वात् संयोगान्तलोपो दुर्व्वीर इति भावः। ङस्योमाङ्डि ति। अत्रैकादेशापन्नोपसर्गस्य पृथक्करणा।
भावे आङ् ग्रहणमेव लिङ्गमित्तरद्व्यं प्रासंगिकमिति भावः। ओ स्त्रीयदिति नवाप्युरवुरित्यादावर्थेव

सि॰ र॰ ति॰ निचरिनार्थत्वादनर्थके पररूपं न भवत्येवेति वाच्यम् । अभिं घुः स्त्रिं घुरित्यघासिद्ध्यापत्तेः रर्थवत्परिभाषा
१५२ पररूपेणेति प्रतिपादितत्वात् कृतनिषेधोपि लिंगामित्यपि वस्तुवचनत्वाद्वा । ओष्ठीपदिति । ओष्ठीपेत्यु
तः प्रागोष्ठिः एकादेशस्य पूर्वान्तत्वेन ग्रहणादोकारत्वात् आङि इति प्राप्तं पररूपं नेत्यर्थः । चशब्देनेति । तथा चौ
सीयदित्यादौ नात्र याणां निषेधं विनापि सिद्धत्वाद्वार्त्तिकं निष्फलत्वेन सिद्धमित्यर्थः । लोहितादिना
पान्तु । आदिशब्दग्राह्याणां श्यामादीनां भृशादिषु पाठात्पूर्वेस्तत्र एव तद्विशेषणं न त्वस्मिन्सूत्र इ
त्यर्थः । तस्येति । आदिशब्दस्येत्यर्थः । उपसर्जनस्यापि तु व्याप्यधर्मगुपस्थापितत्वेन प्राधान्यात्सर्वनाम्ना
परामर्शो भवत्येवेति भावः । इतराणीति । लोहित । नील । मंड । फेन । हरित । मंह । षडेते लोहितादय
:पठिताः । पंच भृशादावेव पाठादित्यर्थः । तस्यापीति । क्यषः ककारस्येत्यर्थः । उपलक्षणं चैतत् । षकार
प्रत्याख्यानस्यापि न च वाक्यषष्ठ्यत्र कथमिति वाच्यं वायादित्येव वस्तुवचनत्वात् । न चयाः अस्याः …त्यत्र राम
परस्मैपदप्रसंगः तस्यापूर्वविधित्वे दोषसत्वेपि सामान्यतः शास्त्रांतरप्राप्तस्य पदद्वयस्य प्रकरणं नियम १५२

मार्थमित्यंगीकारे दोषाभावात्। क्याच्छंदसीत्यत्रापि याच्छंदसीत्येव सूत्रे मकुन्तरायुर्भर्त्सरापुरित्येव
मर्थमिति भाष्याच्च। अत्र काशिकाकृत भाष्येय घप्यादिशब्दस्य अन्पाख्यातस्तथाप्ययपठितेभ्यस्तु क्यषेवम
वति। चर्मायति चर्मायते। एवं निद्राकरुणादयोपाशब्दे सुखदत्याहा तदनुवदति। यत्त्वित्यादिना। दृषपदि
।वितद्भमिति। आदिशब्देन प्रत्याख्याने क्यषो विधायकान्तराभावादित्यर्थः। तेभ्यः क्यङेवेति। ननु केवलं दृ
त्रिकारोक्तरीत्या पंचानामेव भृशादित्वं किं त्वाकृतिगणत्वेन ये संग्राह्यापठिताः शपामादयस्तेभ्योपी ग्र५
तिभावः। लोहिनीयतीति। क्यषंतत्वात्परस्मैपदं पुंवद्भावाभावश्चेति भावः। कष्टायक्रमा विधाव
नार्जवं क्रमणानि षिद्धार्थानुष्ठानमिति यावत्। चतुर्थ्यंतात्कष्टशब्दान्नार्जवेक्यङित्यर्थः। कष्टा
यक्रमणेत्कामति कष्टायत इति भाष्यकैयटादौ व्याख्यातं। एवं स्थिते मूलकृत्फलितं क्रमणशब्दार्थ
थमाह। उत्साह इत्यर्थ इति। अनंतरोपि क्यषिहन संबध्यते। किंतु क्यङेवेत्याह। क्यङ् स्यादिति। क्रमतइति।
वृत्तिसर्गेत्यनेन तङ्। कष्टं कृच्छ्रं कक्षं गहनयोरिति नेह। तेन वचनत्साधनके मिलंद्द्यते सुख्येर्थे उत्साहार्थे

सि॰स॰ति भवानदाह। पापं कर्त्तुमिति। कर्मणोरो। कर्मणा इतियेच मेयकृ वृचनांतप्रत्मे कामिप्रायेण। तदाह। कर्म
१५३ म्यामिति। वर्त्ती तिनियातनामयं तान्त्किन्। तेन रायास अथैतिन मुञ्श। चरतेः संयदादित्वाकौ वेक्किपद
153 न्याश्रयेन। हावर्त्तनायां चरणोचेति। रुखादिभ्यः। कर्मणा इत्यनुवर्त्तते। कर्त्टइतिलुप्तषष्ठीकंभिन्नंपदं।
वेदनानुभवः। कर्त्टवं चतदाश्रयत्वेनैवेत्याह। वेदना कर्त्तुरेवेति। चित्रीयत इति। क्त्विचमवयवेऽकना
र्थसत्कयडंतान्नङ्थीयुक्त भांड। कूरणा इत्यनुकृत्या क्रियाविशेष लाभ इत्याह। युद्धादुदसन इत्यादि
नान्तत्रपुत्ससुदस्यति व्यस्यतिपर्यस्यति इति विग्रहे णिङ्वोदसनादीनांवो धेपितन्न क्रियाविशेषक्रे स्थ ६
मेणावोधायोदादीनां युद्धशद्वात्पाकृप्रयोग इत्यभिप्रेत्योदाहरन्ति। जनु च्छय ते इति। मुंडमिश्र करणाय
हणानुहन्ति धून यन्नाह। रूप इति। तद्वला देव भोजनन्नित्यादयोर्थ विशेषाः सर्वे लभ्यन्त इति भावः।
हल्लोसन्यापूर्ववेति। इदं पदद्वयं विस्मरणा चुरादावने प्रातिपदिकमाह कनयती निरक्रनाह लादेरितिरत्वमि राम
व १ ष्टेदित्य निदेशान्न भवति। पृथुमृदु द्वादिपारिगणितेष्व कृतशद्वाभावात्। ओजढ इति। क्तांते पि भाष्यमते ओ १५३
त्वचः। ध्व इति। निपातनात्कुत्वं नेति मते। ३
वार्तिकमते तु कुत्व प्राप्नि र्न

जिट दित्ये वद्रूपमित्य वो वामा। प्रक्रियायामवर्णापरत्वप ह्रस्यहषितत्वात्। नित्यत्वादिट्लोपश्च तिन्न चांत
रंगत्वात्पररूपशंक्यं। वर्णादांगं बलीय इत्युक्तेरिति भावः। न्याय्यमिति। वार्णपरिभाषाव्याश्रयत्वान्न प्रव
र्तत इति भावः। करवत्तु रित्यत्रान्यस्त्वयं थ विरोधात्तन्नेत्यवधेयम्। त्वादयती त्यादि लक्ष्यस्य प्रामाणिक
त्वेतस्यात्र अनित्यत्वं शरणीकर्तव्यं। अन्यथासिद्धेरिति। प्रकृत्यैकाजित्यस्य प्रेष्ठः स्थेष्ठ इत्याद्युदाहृतं तद्व
त्ति कृद्भिः। प्रस्थाद्यादेशानामाभीयत्वेनासिद्धत्वान्नत्वन्या। स्थ्यानयत्रेऽकारोच्चाररासामर्थ्यात्टिलो
पाप्रसंगान्नार्थः सूत्रेण। एवमनाभीययोः अनयोरपि श्रेष्ठो ज्येष्ठ इत्यत्र। कारोच्चारणा देवनाटिलोपः।
तथा स्त्रग्विनः स्त्रजिष्ठ इत्यपस्थानपयसिष्ठ इत्यत्रापि टिलोपापवादस्य विन्मतोर्लुक स्तत्र लक्ष्ये प्रवृत्तेर
वशिष्टस्य पुनष्टिलोपो न। त्वादयति मादयतीत्याद्यर्थं तु सूत्रमावश्यकमिति भावः। केचित्त्वंगवृ
त्तपरिभाषया न वृद्धिः त्वदयति मदयतीति इत्यर्थः। पुष्मयतीति प्रवादौ न भवतः। विभक्तिपरत्वाभावात्।
युवंतासि। जितिह रदत्तमत्ते विभक्तेर्लुका पहारात्तान चादेशयोरंतरंगत्वात्स्वमेव प्रवृत्तिः शंक्या। अंतरं

गानपीन्यादिपरिभाषणात्। आप्रातिपदिकादेवशीडितिनुव्न हकाउह इत्यायपत्यादिम्पः। क्विपित्वाप्रमाप्र
त्वादमाद्धत्वद्धमद्ध इतिषट् प्रातिपदिकानि। तत्रारव्यपस्यैकत्वेन व्यानामस्मा केवस ँ त्यपि विभ
क्तिषु रूपाणि तुल्यानि वा द्विवबहुत्वयोस्तु रूपाणां भेदो वर्ण्यते। नत्वसर्वस्वन्तत एव विस्तरेणोहत्यमनो
रमाखंडनपूर्वकं प्रसंगादहंप्रत्ययीपदांस्त्र अध्यापितमहाभाष्याविद्वांसस्स्पष्टमत्सराः दरीदृश्यन्ते तत्रै
वस्वान्तेर्थ्ये हेतु महस्थ॥ २॥ ठेरित्यस्यैवेति। इष्टमेयः स्वपरतनए काजनेकासाधारणमेतद्व्यापकं ननु
नस्मद्धितइति। स्वनशाद्दियाणि सत्वेपि प्रेष्ठादौ तदभावात्। प्रत्येकमिमावशास्त्रत्वेकाहे वप्रवर्त्तमानं
व्याप्यमिति। व्याप्येन निरवकाशेन व्यापकस्य बाधोन्याय्य इति भावः। भत्वादिति। द्विषद्भवदित्यतिदेशप्रा
पितात्। संप्रसारणमिति। श्विपुवेत्यनेनेतिशेषः। नचातद्धितइति निषेधशंकयः। शोचोतद्धितत्वात्। नोप्य
तिदेशात्तद्धितत्वं। राणाविष्टवत्प्रातिपदिकस्येत्यत्रायमेयेसमूमीदशात्उपमानात्सम्प्रत्यताद्धितप्र राम
त्ययइतीष्ट निपूर्वस्य यत्कार्यं तस्यैवाति व्यतिदेशात्। नचतद्धितत्वं पूर्वस्य कार्यमित्यतोन तस्यातिदे १५४

शंनचामद्धितइतिनिषेधएवपूर्वस्यकार्यमितिवाच्यं।लाघवात्तस्यपर्युदासत्वेननद्धितेविधिनि
षेधयोर्द्वयोरप्यभावात्।यविष्ठइत्योदाविष्ठनिर्दिष्टस्यओर्गुणस्यापिनातिदेशः।संप्रसारणाट्टिलोपयोर
सिद्धत्वादितिभावः।ज्ञालिष्ठइति।ज्ञलन्तशब्दस्यगुणवचनत्वाभावादिष्ठनःप्राप्त्यभावेपिमतुबन्तादिष्ठन्।
विन्मतोर्लुक्इतिलुकियौगिकत्वेनगुणवचनत्वात्केवलादेववेष्ठनिनस्तद्धितइत्येतद्बाधित्वापरत्वाट्टे
रित्यनेनटिलोपइतिभावः।अश्वनयतीति।अश्वन्इइतिस्थितेप्रकृतिभावेनटिलोपोनिषिद्धः।ततःसंप्रसार
णेकृतेपूर्वरूपंबाधित्वात्तुनटिलोपःप्राप्तःसचवर्णादाङ्गमित्यस्याव्याश्रयत्वादनित्यत्वाद्वाप्रवृत्त्यापूर्व
रूपस्यैवप्रवृत्तौपुनःप्रकृतिभावइतिकथंचिदिदंसमनमित्यरुचेराह॥ ॥आङुरिति।उदीचयतीति।उपसर्ग
स्यपृथक्करणान्नधातोःप्रकृतिभावेनटिलोपोना।उदईदित्यकारस्यईदादेशः।प्रतीचयतीति।अत्रचइस्य
लोपेचाचितिपूर्वस्याणोदीर्घः।प्रत्यचिचरितिति।द्वित्वेपिलोपस्यस्थानिवद्भावाच्छिशब्दस्यद्वित्वं।नत्वासे
भित्यत्रवाडागमःशाकल्यः।नत्रसमानाश्रयत्वेनाल्लोपस्यानीयत्वेनासिद्धत्वादाट्औचित्यपिप्रकृते

सिरुति. व्याश्रपनयात्तदभावादट एवयुक्तत्वात्॥ प्रति अचिचर्दिति॥ न च न समास इति निषेधः पृथक्करणो न स
१५५ मासनिवृत्तेरुक्तत्वात् अन्तरंगं निषेधं प्रति बहिरंगस्याटोऽसिद्धत्वाच्चाय एए शाकलयोस्तु नासिद्धता॥ ना
155 ज्ञानं तर्ह्यद्य इति निषेधात् समीचयतीति॥ नन्विहादेशेन समोऽपहारात्कथं पृथक्करणमिति चेन्न॥ एकादे
न४ शेनापहारे सत्येव पृथक्करणमिति ज्ञापकस्याविशेषापेक्षत्वात्॥ असम्यविचर्दिति॥ अटो बहिरंगत्वेनासिद्ध
त्वादुत्तरपदहेतुकः सम्यादेशः॥ अटः समासानवयवत्वेन सिद्धिनित्यसमासयोरिति शाकलप्रवृत्तिभावनि
षेधो नेत्याह॥ समि अचिचर्दिति॥ एते न पृथक्करणे न समासत्वनिवृत्तिरिति न च्युतात्पर्यं फलितं॥ ति ६
न त्वित्यं समासमध्ये वर्णान्तरप्रयोगानुपपत्तेः॥ सविशेषणानामिति प्रतिषेधाच्च॥ किंचैवं परिहृष्टव्यस्त
मनाय्येत्पादौ लक्त्योत्ते न पुनः समासाभावाल्ल्यबादेशो न स्यात्॥ तान्तदेकस्यैव समासावयवस्य शत्रान्तरे
ण पुनः समासोऽदृष्टचरः॥ एतेनाजहत्स्वार्थापक्षे नाऽपसर्गस्सम्बन्धपदे लक्तोत्ते न सामर्थ्यात् पुनः समस्य राम
ते इतिपरिहृतव्यैत्यादिसिद्धिरिति कैश्चिन्मोक्तं निरस्ताऽजहत्स्वार्थायां दोषतादवस्थ्यात्॥ स्वाततन्त्र्यात् प्रवृत्तिप्र १५५

न्यायप्राप्तिं प्रतिहन्तीव चेत्यत्रैव पृथक्करणे यदि समासत्वमेव स्यात्तदंगीकार्यं तत्राचक्षते इदि सेत्यनयोः सत्त्वयो रा
गमयोर्न कश्चिद्विशेषः समः समि। वाचित्येन योः स्वरयदाधिकारस्थत्वात्स्यादेशादीर्घोदुर्लभा एवेवल
द्वारो कचहस्वक्रमते। यदि तु समी चपति प्रती चपतीत्यादिलक्ष्यं प्रसिद्धप्रयोगप्रामाणिकग्रंथे च प्रमि
तं स्यात्तर्हि दुर्लोप इत्यत्र चकारस्वरग्रहणमनुवर्त्य स्वरपदे पिपक्कचित्कार्यमिति रमयाश्चानुरोधेन भवतीतिज्ञापना
र्थं व्याख्येयमिति कथंचित्समर्थनीयमित्यास्तां तावत्। तिराय युतीति। अत्र त्रीयसर्गत्वाभावात्तिरसः इत्थ
करणानास्तीत्याह। अवेरिति। असिद्धत्वादिति। तन्नरन्त्रेणातरपदपरेहेतुकाश्रयादेशः सिध्यतीतिभावः।
उपधाहूस्वोनेति। अग्रगतस्लोपोपितत्रास्लोपिपयहरीनगहणहतिसिद्धेन्नादितिभावः। सध्र्यं चमिति। एथ्येतत्र
राभाक सर्ववत्। विष्वड्यं चमिति। विष्वग्देवयोश्चेरित्यद्र्यादेशः। देवद्र्यं चमिति। नवार्थेनात्कृतमदाच
द्वितिकारस्करथपरथकारत्वादिकं स्यात्ततश्च देवानंचयतीति प्रयोगः स्यात्। एवमुत्तरत्रापि अमुमंचय
तीति स्यादिति वाच्यं। अपमारोहत्येवतत्र वृत्तेः। इहतु लुप्तः क्विन्। एतत्तु कृत्तु संनियोगात्सिद्धत्वात्सिद्ध

सि॰र॰नि
१५६
156

मि

मः। किंच महाजनस्यासिद्धार्थविषयकमेवतत्। आख्यानग्रहणबलात्। अदड्यंचे ति। अदसोद्रेः पृ
थङ्मुत्वमिति श्लोकवार्त्तिकोक्तचरमपक्षादारभ्यावरोहक्रमेणात्रीणि विग्रहवाक्यानि प्रदर्श्यते नैव क्र
मेणोदाहरति। अददड्यदिति। अदमुयंचमिति। अन्त्यसदेशस्येत्यस्मिन्पक्षे द्वितीयदकारस्य मः।
रेफस्य उकारादेशः। इकारस्य परणः। अदमुआययनीति। णाच्यड्रेरिकारस्य इयादेशो णाव इकारस्य
नुशापि गुणायादेशौ रेफोकारस्य पूर्वत्रासिद्धमित्यासिद्धत्वान्न यणादेश इति भावः। केचिदिहोल्त्ववदिमि नि ५
स्ताध पक्षे विग्रहं। ति। अमुमुयंचमिति। इह हापि पूर्ववदेव प्रक्रिया बोध्या। अमुमुआयदिति। पूर्वत्रासिद्धीय
मद्वित्वद्वत्युक्तेर्द्वित्वे कर्त्तव्ये मुत्वं नासिद्धमस्वयतीति। अव्ययानां भमात्रे टिलोपः प्रकृत्यैकाजिति प्रकृतिभा
वस्तु येन नाप्राप्तिन्यायेन टेरित्यस्यैव बाधक इति भावः। असस्वदिति। गोहूतस्याटिलोपस्य स्थानिव
त्वात्स्वरशाहस्य द्वित्वमित्यर्वाचीनमतेनेदं। निषेधे पंते अजादेशः स्थानिवत्। अच्लादेशस्त्वपां तेन णि राम
ज्विशिष्टस्यैव द्वित्वं युक्तमित्याह। असिस्वदिति। भावयनीति। बहुशब्दस्य भूरादेशः इष्ठस्य यिट्चेनीष्ठ निनस्यभि १५६

धानात्। इष्टवदित्यत्र सन्नम्यंनाद्धनिरित्यकत्वात् पिडागमाभावेन तत्संनियोगशिष्टो भ्रस्भावोपि नेति म
तांतरमाचष्टे। बहपतीन्यन्यद्वति। एतच्चदेरिति सूत्रे कैय्यटे व्यक्तं। स्वजयतीति। टिलोपापवादस्य विन्म
तोर्लुकः प्रवृत्तत्वात्तु नष्टिलोपो नासिद्धात् पूर्वकेति। यत्त्वंगवृत्तपरिभाषया न वृद्धिरिति कैयटेको स्कभ
योरुक्तं। तत्त्वं त्यां लुको नागत्वेन तत्स्थाः प्राप्त्यभावात्। न वृद्धिरिति। टिरिति सूत्रे स्वजयतीति भाष्योदाहर
णामत्रमानाकुलत्वं तु ना इष्टवद्भावेन भत्वात्। आमतीमिति। टोश्चि स्वंवद्भावेमतुयो लुक्। वृद्धिः। आयय
ति। नेति मतेतु अययति। अतएवाह। अशिश्रपादिति। आघमतेतु अशिश्रायदिति स्यात्। अग्लो
पित्वेनोपधाह्रस्वनिषेधप्रसंगात्। पपयसयतीति। लुङि तु अपपपयसत्। असस्वजत् इत्येव। सन्वद्
त्वादित्वं तु न। विन्मतोर्लुकपि अनग्लोपइति निषेधात्। अगनग्लोपेपि सन्वद्भावादित्वं नेति भाष्य
सिद्धांतात्। गोमंतं गावयति। मतांतरेतु गवयति। चङि। अजुगावत्। अजूगवदिति मतभेदाद्रूपद्वयं।
स्वजपयइत्यादिविग्रहे तु असिस्वजत्। अपपयत्। इहाग्लोपित्वान्न दीर्घसन्वदित्वे स्तः। गां अजूगव

सि॰र॰ति
१५७
157

त्रानावंश्रन्ननवदित्यादिाइत्येचस्तवृधातोः सन्वड्ढावोवेति व्यवस्थाभ्रन्यंवचनं प्राचापत्यपठितं
तड्ढाष्याादावभावादप्रमाणामेवास्थवपतीति डुहत्युरत्स्याा ऽनलक्षणाा हे ङिः प्राप्नाश्रगहन्नपरिभा
षयानेतिराद्धांतइति संप्रदायः। एवंदवयति युवयतीत्यादौ ऽप्यापयतीति। वृद्धस्य चेति ऽपः। सच्चृणि
यस्थिरेतिवर्षादेशेनविकल्प्यते। वचनंद्रूपप्रामाण्यात्तदाह। वर्षयतीति। वरयतीति। वराद्
शेहृद्धिर्नेति सर्वधातवर्त्तौमाधवोक्तेनेवाद्धिः। स एवौराौतौ वृद्धिमुदाहरद्दित्याह। वारयतीति।
नवृद्धिविकल्पाद्रूपद्वयंसिद्धम्॥ ॥युक्तिप्राबल्ययुक्तेश्रीतेऽरत्नाकरेऽस्तुलोत्र्रहंव्याचक्षिस्मवा
त्स्रवेंकरुशस्यतुष्टये॥ ॥ ॥इतिश्रीमद्वैयाकरणसिद्धांतरत्नाकरेनामधातुप्रक्रिया॥ ॥ ॥क
राड्वादिभ्यः। यङ्ङिःघितोधात्वच्छिकारमभिसेधायाह। धातुभ्यइति। तेनयकआर्धधातुकसंज्ञासिद्धा
।नित्यामिति। वेति। निर्वृत्तमिति भावः। धातुभ्यइत्यनेनप्रातिपदिकेभ्योनयगित्यपिसूचयन्नाह। द्विधा राम
हीति। तथाचभाष्यंधातुप्रक [illegible] रणाद्धातुःकस्यचासंजनादपि। आहं यमिमंदी १५७
हवा।

र्घमन्ये धातुर्विभाषित इति। तत्र धात्वधिकारात्कुगानिषेधफलकं कित्करणं त्वासं दिग्धं धातुत्वं वा नि-
त्वाङ्नित्वानुबंधस्तु न लिंगं। तस्यावयवे ऽकृतार्थेन यगंतविशेषकत्वात्। तेषां मध्ये केचिद्दीर्घान्ताः
कंडूञ् असु ञ् इत्यादयः पठिताः सावदीर्घान्तता प्रातिपदिकत्वाभावे व्यर्था। अकृत्सार्वधातुकयो
रित्यनेनैव सिद्धेरित्यर्थः स्वार्थ इति। यत्तु प्राचोक्तं कंड्वादिभ्यो यक् स्यात्स्वार्थ इति। यच्च कंडूं करोति
कंडूयतीति। यच्च नामधातुत्वाद्धात्वेर्द्वित्वे प्राप्ते कंड्वादेस्तृतीयस्येति नियम्यत इति। तत्सर्वं भाष्ये कैय्य
ट वृत्त्यादिविरोधादप्रामाणिकमेवेत्युपेक्ष्यं। प्रातिपदिकस्य रूपाणि तु कंडूः कंड्वौ कंड्वः इत्यादीनि [illegible]वत्। वधू६
मंतूयतीति। अकृत्सार्वेति दीर्घः। अथवा तोऽस्मान्मंतुः मंतू इत्यादिशंभुवत्। एवमग्रेऽपि। कुषुभ्यतीति। अ-
तो लोप इत्यकारलोपः। न च परत्वाद्दीर्घः शंक्यः। रायल्लोपावित्युक्तेः। अकारोच्चारणसामर्थ्याद्धातुत्वेऽश्रवणार्थ
मा। कुषुभं कुषुभ इत्यादौ तु तरत्राप्येवमदंतेषु द्रष्टव्यं। न च यथा लेट् लोट् इत्यादिष्विव हलंतान्येव पठ्येरन्नि-
ति भाव। अस्य पाके विन्मनस्त्रयनापमतियठं। तान्न मनस्स इत्यपस्य निर्देशात गिनमेवायमेव सर्वभावेऽस्य

सि.र.ति त्रपूर्वशाद्वोयिवेचित्तुधात्वंतरनितिमत्वानामनस्यतिष्ठर्यतीत्युदाजह्रिरे॥ ॥युक्तिप्राचुर्यपुनेश्रीतेडे-
१५८ न्नाकरेणले॥ अहंव्याचक्षि कंड्वादीनवेकटेशास्यतृष्ये॥ ॥इति रत्नाकरे कंड्वादयः॥ ॥प्रथमस्य
158 तिाज्यलक्षणामजोदेर्द्वितीयस्यापि कंड्वादेरिति कंड्वादिप्रकृतिकयगन्तस्येत्यर्थः। न च भुरणगदादि
षुतृतीयस्य संभवात्किं लक्षणायेति वाच्यं कंडूयियिषतीत्यादिषु भाष्यादौ पि शब्दस्यद्वित्वदर्शना
त्तौतृतीयस्येति। अपूर्वविधिरयं नत्वप्राचीनोक्तरीत्या नियमः। कंड्वादीनां नामधातुत्वं नास्तीति भाष्य
राद्धांतात्तान्न चैवमपूर्वविधित्वे प्रथमद्वितीययोर्द्वित्वबाधो न स्यादिति वाच्यम्। तत्र कोडिरपि न्याये
नत्वनुपपत्तेः। भ्ररणयतेः सनि भ्ररणिणिषतीत्यस्सूयियिषतीत्यादि वो ध्यं। न च सुखदुःखले घ्लो
घेत्यादीनां च सनि तृतीयस्याचोऽभावात्कस्य द्वित्वमिति चेन्न। तत्र सन एव द्वित्वाभ्युपगमात्। कंड्वा
त.२ दिघटिद्वित्वमाडिधानौ कंड्वादिशब्दस्य लक्षणाभ्युपगमात्तथाच स्तुस्थिषिषतीत्यादिरूपाणि बोध्यानि राम
निश्च तत एवनामधातुत्वसमाप्य कंड्वादयः पृथगुक्ताः। आद्येतरस्येति। यद्यपीदं द्विर्यियिषतीत्यादावाधद्वित्वे १५८
तत्राल्लोपस्य स्थानिवत्त्वान्निषेधाद्धातायस्याद्द्वित्वे हलादिशेषेणायलोपउत्तरखण्डे य
स्य हल इति यलोपेऽतो लोपः; १४

पिबाधकाभावं अभ्यासङ्कृत्वे नेष्ट सिद्धेः। तथाप्याशीयतेः सति दोषं स्यादेवा नचेष्टापत्तिः। यथेष्टं नामधा
तुष्विप्सुतेः। नचाङादावाघस्यद्वित्वमिष्टमितिभावः। अवः परस्येवेति। अजादेरित्यत्र कर्मधारयात्पंचमी
त्युक्तत्वादितिभावः। प्रियमाख्यातुमिति। आख्यातुमिच्छतीत्यन्वयः। तत्करोतीत्याघर्थे णिच्। तदंतात्सन्। आ
चख्यारयामिति। प्रियमाचख्यारयां प्रेरयितुमिच्छतीति लौकिको विग्रहः। तत्र प्रियशब्दात्तदाचष्ट इति णिच्। तदंता
द्धेतुमति णिच्। ततः सन्। आघस्य णिचो लोपः। प्रायंयंतं प्रेरयितुमिच्छतीति हेतुमत्सि बृंहुहरतिप्यंत बृंहति विग्र
हवाक्यं। तरंतो ध्यमाघत्वं तुनेति। वाच्छशब्दस्य सादादेशे सकारस्यादेशावयवो नत्वादेशरूपः। तस्यैव चपष
त्वविधानादितिभावः। यङ्। णिङित्यादि द्वौ णिचौ। तयोर्मध्ये एकः सन्नित्यर्थः। तथाच वोभूय यिषिद्वित्वं वह
योर्द्वितीयणिडं तो धातुस्तत्त्तोल्कारे गुणायादेशयोः सतोः। बोभूययिषयतीति सिद्धम्॥ ॥युक्तिप्रावृषियुक्ते
श्रीतेडेरलाकरेवुले॥ भयात्प्रत्ययमाले यं वेंकटेशस्य तुष्टये॥ ॥इति प्रत्ययमाला॥ अनुदात्तङितः॥ व्या
स्यातमपि स्मारितं प्रकरणावगतयेकर्तरिकर्मकर्मे हक्रिया। नतुरूपिमं व्याख्यानात्। अन्यस्य योगप्तिाय
मि १

सि.र.त्रि रस्परकरणमपि कर्मव्यतिहारः।संप्रहरन्ते राजानः।कर्तृग्रहणं शेषात्कर्तरीत्यत्रानुवृत्त्यर्थंयस्य ष्टार्थमिहकृतं।
१५८ तत्प्रयोजनं च वक्ष्यते।व्यतिस इति।पच्यपरत्वाभावान्न षः।व्यतिसदृति।सात्यदाद्योरिति षस्य निषेधः।ए
159 कदेशविकृतन्यायेन प्रत्ययस्य पदत्वात्।न गति।एभ्यः क्रियाव्यतिहारे आत्मनेपदं न स्यात्।हरन्तेरि
तिा केचित्तूपसर्गविशेषेण हिंसायां वर्तमानान्निषेधो मा भूदित्येतदर्थं सूत्रेऽर्थग्रहणमिति वार्तिकं प्रत्याच
सं ५ क्षते।ततः संप्रहरिष्यन्तौ हस्ताकरौ धनंजयावित्यत्र वयोस्तुल्यमानाविति व्याख्यानादात्मनेपदप्राप्तिरेव
नास्तीति बोध्यं।वहेस्तु नासौ निषेधः गत्यर्थत्वाभावात्।प्रायेण हि तेऽर्थाः।गमकत्वात्प्रायिकमिति।इतरेतरा।क ६६
र्मव्यतिहारे आत्मनेपदं न स्यात्।लौकिके शब्दव्यवहारे लाघवं प्रत्यनादरेणेतरेतरादिशब्दैर्व्यतिशब्द
स्य क्रियाविनिमयद्योतनार्थं यथा प्रयुज्यते तथात्मनेपदमपि समुच्चयेन प्रयुज्यतेत्यर्थं निषेध आरब्धः।संप्र
द्विनिमये नो भोद धनुर्भुवनं जयमित्यत्र तु करणविनिमयो विवक्षितो न क्रियाविनिमय इति नात्मनेपदं।ने राम
र्विशः।अर्थवत्त्वप्रतिपदोक्तत्वाभ्यामुपसर्गस्य नेर्ग्रहणं।तेन मधुनि विशन्ति भ्रमरा इत्यत्र न दोषः।कथं तर्हि १५८

दूर

इत्युक्त्वा मैथिलीं भर्तुरंके निविशती भयादिति। अत्र प्रयोग एवायं। पत्तु पद संस्कार पक्षे साधुत्वमिति दुर्घट
वृत्तिकृत्। तन्न। वालिसायां उपाध्व विभाषाः कम्मिकादित्यादि विकल्प वैयर्थ्यापत्तेः। पदांतर संबंधे विकीर्ण
ते नियमग्रहणेरावश्यकत्वाच्च। अन्यथा त्वं भवतीत्यादेरपि साधुतापत्तेः। कथं न्यविशतेति। अटा व्यवधाना
त्। नवत्तदागमा इत्यनेन निस्तारः। अटो गम कृत्वेन धातोरभक्तत्वात्। मैवं। लावस्थायामडिति भाष्यपक्षे
दोषाभावात्। पक्षांतरे त्वुपसर्गे पूर्वस्य नियमे ह्यवाय उपसंख्यानमिति वार्तिकमस्तीति बोध्यं। पक्षाने रिति न
पं चमी। का न हि शेष षष्ठी। एवं च वार्तिकं स्वत्यजो। एतच्च शब्दे [illegible]ितइत्यत्र भाष्य कैयटयोः स्पष्टम्। विपराभ्यां। य
स्मरसा हवर्यो उपसर्गपीरेव ग्रहणं। नेह। बहु विजयति वनं। पराजयति सेनेति। आङो दः। व्यादत्ते विहगपतिर्मु
